दुहितृत्वे महात्मनः । ततस्तुष्टो महातेजाः श्रोत्राभ्यामसृजत् प्रभुः । तस्माज्जह्नुसुता गङ्गा प्रोच्यते जाह्नवीति च"। जह्नोरपत्यमण् ङीप् । जाह्नवी गङ्गायाम् । "जाह्नवीतीरसम्भूतां मृदं मूर्द्ध्ना बिभर्त्ति यः" प्रा० त० । जह्नोरियं अण् वेदे पृषो० ह्रस्वाकारविपर्य्ययौ । जह्नावी जह्नुसम्बन्धिन्यां प्रजायाम् । "आ जह्नावीं समनसो पराजैः" ऋ० १।११६।१८ । "जह्नावी जह्नोर्महर्षेः सम्बन्धिनी प्रजा" भा०।२विष्णौ च "सत्कर्त्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः" विष्णुस०। "जनान् संसारादपह्नुते अपनयतीति जह्नुः जहात्यविदुषः स्वभक्तान्नयति परं पदमिति वा" भा० तद्व्युत्पत्तिर्दर्शिता पृषो० साधु ।

**जह्नुकन्या** स्त्री ६त०।१गङ्गायाम् ।"जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम्" मेघ० "जलनिधिमनुरूपं जह्नुकन्यावतीर्णा" रघुः । जह्नुतनयादयोऽप्यत्र ।

**जह्नुसप्तमी** स्त्री वैशाखशुक्लसप्तम्याम् ।"वैशाखशुक्लसप्तम्यां जह्नुना मुनिना पुरा । क्रोधात् पीता पुनस्त्यक्ता कर्ण्णरन्ध्रात्तु दक्षिणात् । तस्यां समर्च्चयेद्देवीं गङ्गां भुवनमेखलाम् । स्नात्वा सम्यग् विधानेन स धन्यः सुकृती नरः । तस्यां सन्तर्पयेद्देवान् पितॄन् मर्त्यान् यथाविधि । साक्षात् पश्यन्ति ते गङ्गास्नातकं गतपातकम्" वराहपु० ।

**जह्मन्** न० हा—मनिन् पृषो० द्वित्वान्त्यलोपौ । उदके निघ० उदकनामसु तत्र जन्मेति पाठान्तरम् ।

**जा** स्त्री जन—बा०ड ।१मातरि २देवरपत्न्याम् एकाक्षरको० । ४जननकर्त्तरि त्रि० गवादौ उपपदे जन—विट् ङा । गोजा गविजाते त्रि० ।

**जागत** त्रि० जगती छन्दोऽस्य अण् । जगतीच्छन्दस्के मन्त्रादौ । जगत्यां भवः उत्सा०अञ् । २जगतीच्छन्दसि भवे सामभेदे न० । ३ जगत्यां पृथिव्यां भवे च त्रि० ।

**जागर** पु० जागृ—भावे घञ् गुणः । १निद्राक्षये ( जागा ) अमरः "त्रयोदशसमास्तीर्णा जागरेण सुदुःखिताः" भा० क० ८६ अ० । "रात्रिजागरपरो दिवाशयः" रघुः । २अन्तःकरणस्य तत्त्वत्त्वस्तुप्रकाशात्मके वृत्तिभेदे ।

**जागरक** त्रि० जागृ—ण्वुल् गुणः । निद्रारहिते ।

**जागरण** न० जागृ—भावे ल्युट् । १निद्राराहित्ये ।

**जागरित** न० जागृ—भावे क्त गुणः । १जागरणे निद्राभावे २इन्द्रियैरर्थज्ञाने स्वप्नदर्शनहेतुकर्म्मक्षये च जागरितमागच्छन् स्वोपाध्यन्तःकरणेन्द्रियसचिवस्तत्तदिन्द्रियविषयाननुमेयांश्च स्थूलान् व्यवहारिकान् सर्वाननुभवति यत्रावस्थायां तत् जागरितमित्युच्यते वेदान्तमतम्

**जागरितस्थान** पु० जागरितं स्थानमस्य । वेदान्तिमतसिद्धे वैश्वानरे आत्मनि । तत्स्वरूपादिकं माण्डूक्योपनिषदि तद्भाष्ये च दर्शितम् ।

"जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः" माण्डूकोप०

"जागरितं स्थानमस्येति जागरितस्थानः । बहिः स्वात्मव्यतिरिक्ते विषये प्रज्ञा यस्य स बहिःप्रज्ञो बहिर्विषयेषु प्रज्ञाऽविद्याकृताऽवभासत इत्यर्थः । तथा सप्ताङ्गान्यस्य "तस्य ह वैतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादौ"अग्निहोत्रकल्पनाशेषत्वेनाग्निमुखत्वेनाहवनीय उक्त इत्येवं सप्ताङ्गानि यस्य स सप्ताङ्गः । तथैकोनविंशतिर्मुखान्यस्य बुद्धीन्द्रियाणि च दश वायवश्च प्राणादयः पञ्च मनो बुद्धिरहङ्कारश्चित्तमिति मुखानीव मुखानि तान्युपलब्धिद्वाराणीत्यर्थः । स एवं विशिष्टो वैश्वानरो यथोक्तैर्द्वारैः शब्दादीन् स्थूलान् विषयान् भुङ्क्ते इति स्थूलभुक् । विश्वेषां नराणामनेकधा नयनाद्विश्वानरः। यद्वा विश्वश्चासौ नरश्चेति विश्वानरः विश्वानर एव वैश्वानरः । सर्वपिण्डात्मानन्यत्वात् स प्रथमः पादः" भा० ।

**जागरितान्त** पु०जागरितस्यान्तः तत्र विज्ञेयः । जागरितमध्ये तत्र विज्ञेये "स्वप्नान्तं जागरितान्तञ्चोभौ येनानुपश्यति" कठोप० "स्वप्नान्तं स्वप्नमध्यं स्वप्नविज्ञेयमित्यर्थः । तथा जागरितान्तं जागरितमध्यं जागरितविज्ञेयं चोभौ स्वप्नजागरितान्तौ येनात्मनानुपश्यति लोकः" भा० ।

**जागरितृ** त्रि०जागृ—शीलार्थे तृच् । जागरणशीले अमरः।

**जागरिन्** त्रि० जागृ—शीलार्थे णिनि गुणः। जागरणशीले हेमच० स्त्रियां ङीप् ।

**जागरूक** त्रि० जागृ—ऊक । जागरणशीले अमरः "स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव" रघुः । २स्वकर्त्तव्ये सावधाने अप्रमत्ते च "वर्णाश्रमावेक्षणजागरूकः" रघुः।

**जागर्त्ति** स्त्री जागृ—भावे क्तिन् । जागरणे रायमु०।

**जागर्य्या** स्त्री जागृ—भावे क्यप् गुणः। जागरणे । श । जागरायत्र स्त्री अमरः ।

**जागुड** पु०१देशभेदे सोऽभिजनोऽस्य अण् । २तद्देशवासिनि त्रि०